१०२९

पुणे. २ रुमाल

नारायण भट

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

अथप्रयोगरत्नस्यानुक्रमणिकाआरभ्यते ।

(2)

प्र॰ र॰ र॰ १ | अनु॰

| | | | | | |
|---|---|---|---|---|---|
| श्रीगणेशायनमः ॥ | ॥अथप्रयोगरत्नस्यानुक्रमणिकालिख्यते ॥ | | | ३२ | गर्भाधानाद्याःसंस्काराउच्यंते |
| १ | मंगलाचरणश्लोकाः | १६ | ऋतुसंरक्षकदेवतावाहनं | ३३ | अथशांतिरुच्यते |
| १ | संस्काराः | १७ | अथहोमः | ३६ | चंद्रसूर्योपरागेप्रथमरजोदर्शनशांतिविशे॰ |
| २ | स्वस्तिवाचनम् | १९ | विवाहोत्तरकर्तव्यस्थालीपाकः | ३८ | गर्भालंबनाख्यंगर्भाधानं |
| २ | तस्यप्रयोगविधिः | १९ | पर्वनिर्णयः | ४० | पुंसवनानवलोभनयोःप्रयोगः |
| ४ | अथप्रयोगः | २० | विकृतिनिर्णयः | ४१ | सीमंतोन्नयनं |
| ७ | अंकुरार्पणप्रयोगः | २० | स्थंडिलकरणनिर्णयः | ४१ | तत्प्रयोगः |
| ७ | अभ्युदयिकश्राद्धविधिःप्रयोगश्च | २४ | अथावदानधर्माः | ४२ | विष्णुबलिः |
| १० | कौतुकविधिप्रयोगः | २६ | दृष्टिप्रायश्चित्तानि | ४३ | जातकर्म |
| ११ | ग्रहयज्ञविधिः | २७ | प्रसंगादत्रैवनैमित्तिकप्रायश्चित्तानि | ४४ | षष्ठीपूजा |
| १२ | तत्प्रयोगः | २९ | सकलकर्मसाधारणपरिभाषा | ४४ | नामकरणप्रयोगः |

४५ पर्यंकारोहणम्
४५ दुग्धपानं
४५ कर्णवेधः
४६ सूर्यावलोकनंनिष्क्रमणंच
४६ उपवेशनविधिः
४६ अन्नप्राशनप्रयोगः
४७ वर्धापनविधिः
४८ अथचौलम्
४९ चूडाकर्मप्रयोगः
५० अथोपनयनम्
५० तत्प्रयोगः
५४ मेधाजननप्रयोगः
५५ महानाम्न्यादिव्रतानि
५८ महाव्रतप्रयोगः
५८ उपनिषद्व्रतप्रयोगः
५८ गोदानप्रयोगः
५९ ब्रह्मचारिव्रतलोपप्रायश्चित्तं
६० समावर्तनप्रयोगः
६३ क्रमप्राप्तोपवाहः
६५ कन्यादातारः
६५ विवाहभेदाः
६५ वाग्दानप्रयोगः
६६ विवाहेमंडपप्रकारः
६६ विवाहपूर्वदिनकृत्यं
६७ वरस्यवधूगृहेगमनम्
६७ अथमधुपर्कः
६८ विष्टरलक्षणम्
६९ कन्यादानम्
७२ विवाहहोमः
७४ गृहप्रवेशनीयहोमः
७४ विवाहाच्चतुर्थदिनकृत्यं
७५ देवकोत्थापनमंडपोद्वासनविधिः
७५ वध्वाःप्रथमगृहप्रवेशः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)



७६ विवाहेआशौचादिनिर्णयः
७६ पुनर्विवाहः
७७ द्वितीयादिविवाहविधिः
७७ अर्कविवाहः
७९ अग्निद्वयसंसर्गविधिः
८० होमकालः
८१ उपासनाप्रयोगः
८२ आशौचेहोमविधिः
८२ आपत्कर्तव्योहोमस्यसमासप्रयोगः
८२ गुर्वादिपक्षहोमः
८३ सभार्यस्यप्रवासेप्रसक्तेअग्निसमारोपवि॰
८३ अग्निसंसर्गदोषेप्रायश्चित्तं
८४ नष्टाग्नेः पुनःसंधानप्रयोगः
८४ विच्छिन्नस्यगृह्याग्नेः पुनःसंधानम्
८६ विवाहोत्तरंदंपत्योर्गृहप्रवेशः
८६ अथातःपरंद्विजातीनांसंस्कृतिर्नियतो
च्यते
८७ श्रवणाकर्म
८८ सर्पबलिः
८९ आश्वयुजीकर्म
८९ आग्रयणप्रयोगः
९० प्रत्यवरोहणम्
९१ पिंडपितृयज्ञः
९३ अल्पवक्तव्यत्वात्सार्वणाश्रा
द्धात्पूर्वमष्टकाप्रयोगः
९४ अष्टमीश्राद्धप्रयोगः
९५ अन्वष्टकाख्यनवमीश्राद्धप्रयोगः
९७ अथाष्टकाविकृतिभूतामाघ्या
वर्षश्राद्धप्रयोगः
९८ प्रतिमासमपरपक्षश्राद्धं

समाप्तेयमनुक्रमणिका
श्रीकृष्णार्पणमस्तु
शुभंभवतु



" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3A)

# अथ नारायणभट्टकृत प्रयोगरत्नं प्रारभ्यते·

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीवेदपुरुषायनमः ॥ श्रीगुरुचरणारविंदाभ्यांनमः ॥ श्रीरामंसपरीवारंगणेशंचसरस्वतीम् ॥ आश्वलाय
नतच्छिष्यान्प्रणम्यपितरंगुरुम् ॥१॥ भट्टरामेश्वरसुतोभट्टनारायणः सुधीः ॥ प्रयोगरत्नंकुरुते काश्यांशिष्टेष्टतुष्टये ॥२॥ ग्रंथेस्मिन्गुणगणवत्वमुच्य
तेचेत्स्वंग्रंथंगुणगणवंतमाहकोन ॥ तत्संतः शिरसिकृतांजलिस्तुयान्वेशोध्यंतत्सदसद्धिहोच्यतेमयायत् ॥३॥ ॥ अथसंस्काराः ॥ तेचाष्टचत्वा
रिंशत् ॥ तथाचगौतमः ॥ गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनचोलोपनयनानिचत्वारिवेदव्रतानिस्नानंसहधर्मचारिणी-
संयोगः पंचानांयज्ञानामनुष्ठानमष्टकापार्वण श्राद्धंश्रावण्याग्रहायणीचैत्रीआश्वयुजीतिसप्तपाकसंस्थाः अग्न्याधेयमग्निहोत्रंदर्शपौर्णमासौचा
तुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबंधःसौत्रामणीतिसप्तहविर्यज्ञसंस्थाअग्निष्टोमोत्यग्निष्टोमउक्थ्यःषोडशीवाजपेयोतिरात्रोप्तोर्यामइतिसप्तसोमयज्ञ
संस्थाइत्येतेचत्वारिंशत्संस्काराः ॥ अष्टावात्मगुणाश्च ॥ दयासर्वभूतेषुक्षांतिरनुसूयाशौचमनालस्यंमांगल्यमकार्पण्यमस्पृहेतियस्यैतेचत्वारिंशत्सं
स्काराःअष्टावात्मगुणाश्चसब्रह्मणासायुज्यमाप्नोतीति ॥ पार्वणः पार्वण स्थालीपाकः ॥ श्राद्धममावास्यादि ॥ श्रावणीतत्रकर्तव्यंश्रवणाकर्म ॥ आ-
ग्रहायणी ॥ तत्रकर्तव्यंप्रत्यवरोहणं ॥ चैत्री ॥ तत्रकर्तव्यः शूलगवः ॥ आश्वयुजी ॥ तत्रकर्तव्यमाश्वयुजीकर्मेतिहरदत्तोव्याचख्यौ ॥ अंगिरास्तु ॥
पंचविंशतिसंस्कारैः संस्कृतायेद्विजातयः ॥ तेपवित्राश्चयोग्यास्युः श्राद्धादिषुसुयंत्रिताः ॥ आदिशब्दाद्याजनादौ ॥ गर्भाधानंपुंसवनंसीमंतोबलि
देवच ॥ बलिर्विष्णुबलिः ॥ जातकृत्यंनामकर्मनिष्क्रमोन्नाशनंपरम् ॥ चौलकर्मोपनयनंतद्व्रतानांचतुष्टयं ॥ तच्छब्देनप्रसिद्धत्वाद्वेदग्रहणेतद्व्रता १

नांवेदव्रतानामित्यर्थः॥स्नानोद्वाहौचाग्रयणमष्टकाचयथातथम्॥श्रावण्यामाश्वयुज्यांचमार्गशीर्ष्यांचपार्वणम्॥उत्सर्गश्चाप्युपाकर्ममहायज्ञाश्चनित्यशः॥संस्कारानियताह्येतेब्राह्मणस्यविशेषतइति॥श्रावण्यांश्रवणाकर्मादीत्यादिपूर्ववद्व्याख्येयम्॥नियतानित्याः॥एतेषांपंचविंशतीनांनैमित्तिकवार्षिकमासिकनित्यभेदेनचातुर्विध्यमाहाश्वलायनः॥नैमित्तिकाःषोडशोक्ताःसमुद्वाहावसानकाः॥सप्तैवाग्रयणाद्याश्चसंस्कारावार्षिकामताः॥मासिकंपार्वणंप्रोक्तमशक्तानांतुवार्षिकम्॥महायज्ञास्तुनित्याःस्युःसंध्यावच्चाग्निहोत्रवदिति॥अत्रगर्भाधानाद्याउपनयनांताएवसर्वेषांनियताः॥नतुस्नानाद्याः॥तेनब्रह्मचर्यादेवप्रव्रजेदित्यादिनविरुध्यते॥एतेचद्विजानामेवसमंत्रकाः॥तदाहयाज्ञवल्क्यः॥ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वाद्यास्त्रयोद्विजाः॥निषेकाद्याःश्मशानांतास्तेषांवैमंत्रतःक्रियाइति॥वैएवार्थः॥अत्रतेषांमेवमंत्रतःक्रियाइतिवदन्शूद्रस्यामंत्रकाःक्रियाइतिसूचयति॥अतएवसंस्कारानधिकृत्ययमः॥शूद्रोप्येवंविधःकार्योविनामंत्रेणसंस्कृतइति॥ ॥इतिसंस्काराः॥

अथस्वस्तिवाचनं॥ ॥तद्यत्रकर्तव्यंतदुच्यते॥ ॥व्यासः॥ ॥संपूज्यगंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत्॥धर्मकर्मणिमांगल्येसंग्रामेद्भुतदर्शने॥ ॥गृह्यपरिशिष्टे॥ ॥अथस्वस्तिवाचनमृद्धिपूर्तेषु॥ऋद्धिर्विवाहांताअपत्यसंस्काराः॥प्रतिष्ठोद्यापनेपूर्तंतत्कर्मणश्चाद्यंतयोःकुर्यादिति॥ ॥आश्वलायनस्मृतिः॥ ॥वैदिकेतांत्रिकेचादौततःपुण्याहइष्यते॥ ॥शौनकः॥ ॥पुण्याहवाचनविधिंवक्ष्यामोथयथाविधि॥प्रयोक्तुःकर्मणामादावंतेचोदयसिद्धयइति॥ तच्चप्रयोगांतर्गतमितिकेचित्॥बहवस्तुप्रयोगबहिर्भूतमिति॥आद्यपक्षेकर्मप्र

प्र·ग·न· योगसंकल्पंकृत्वाकार्यम् ॥ द्वितीयेतुतत्कृत्वाकर्मसंकल्पः ॥ ॥ अथप्रयोगः प्रयोगपारिजातानुसारेणोच्यते ॥ यजमानः कृताभ्यंगादिः स्वलंकृतो पु·वा·
२ दर्भपाणिः शुचिर्भूत्वामंगलसंभारंसंभृत्यस्वलंकृतेगृहेगोमयोपलिप्तभूमौसोत्तरछदेभद्रासनेउदङ्मुखउपविश्यस्वदक्षिणपार्श्वेसंस्कार्यमु
दङ्मुखमुपवेश्यरंगवल्लिकायुक्तेभूतलेप्रस्थपरिमितस्याशक्त्यान्यूनस्यवाधान्यस्योपरिदक्षिणोत्तरयोः सुवर्णरजततात्रमृन्मयान्यतमक
लशद्वयमव्रणंमनोहरंअलंकृतंशुद्धपुण्यजलपूरितंसपल्लवंसफलंनिधायसूत्रवेष्टितोत्तरकलशेपंचरत्नानिनिक्षिप्यतदुपरिसिततंडुलपूरि
तंसफलंपात्रंनिधायतत्पश्चिमदेशेप्रशस्तान्प्रतिवचनसमर्थांस्तद्दिवसेश्राद्धादिष्वभुक्तवतोनिषिद्धप्रतिग्रहनिवृत्तान्शुचीन्सोत्तरीयान्दर्भ-
पाणीन्युग्मान्ब्राह्मणान्प्राङ्मुखानासनउपवेश्यगंधपुष्पादिभिरभ्यर्च्ययथाचारम् ॥ सुमुखश्चेत्यादिभिर्गणपतिंस्मृत्वाषोडशोपचारैरभ्यर्च्य
उत्तरकलशेदेवताआवाहयेत् ॥ तद्यथा ॥ कलशस्यमुखेविष्णुः कंठेरुद्रः समाश्रितः ॥ मूलेतत्रस्थितोब्रह्मामध्येमातृगणाः स्मृताः ॥ कुक्षौतु
सागराः सर्वेसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदः सामवेदोह्यथर्वणः ॥ अंगैश्चसहिताः सर्वेकलशंतुसमाश्रिताः ॥ पुष्टिः शांतिश्चगायत्री-
सावित्रीचसरस्वती ॥ आयांतुयजमानस्यदुरितक्षयकारकाः ॥ सर्वेसमुद्राः सरितस्तीर्थानिजलदानदाः ॥ आयांतुममशांत्यर्थंदुरितक्षयका
रकाः ॥ एवमेताः समावाह्यकलशेदेवतास्ततः ॥ एतान्मंत्रस्थितान्देवान्संपूज्यप्रार्थयेत्क्रमात् ॥ ततः ॥ सर्वेषुकालेषुसमस्तदेशेष्वशेषका- २
र्येषुतथेश्वरेश्वरः ॥ सर्वैः स्वरूपैः स्तुतिमाननादिर्ममास्तुमांगल्यविवृद्धयेहरिः ॥ यत्रयोगीश्वरः कृष्णः० ॥ अनन्याश्चिंतयंतोमां० ॥ स्मृतेस

Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

कलकल्याण॰ ॥ सर्वेष्वारंभकार्येषु॰ ॥ सर्वमंगलमांगल्ये॰ ॥ तदेवलग्नमितियथाचारंपठित्वा ॥ लक्ष्मीनारायणंनत्वा ॐ दुर्गायैनमइतिप्रणवादि
चतुर्थ्यंतनमोंतनामभिः दुर्गांक्षेत्रपालंवास्तुपुरुषंमातृःपितृनाचार्यानिष्टदेवताः कुलदेवताः ग्रामदेवताः सर्वादेवताः सर्वान्ब्राह्मणानितिसर्वान्प्र-
त्येकंनत्वाप्राणानायम्यदेशकालौसंकीर्त्यामुककर्मकर्तुमादौशुद्धिवृध्यभ्युदयसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंब्राह्मणैःसहस्वस्तिपुण्याहवाचनंक
रिष्येइतिसंकल्पयेत् ॥ ततःसर्वेब्राह्मणाःप्राङ्मुखास्तिष्ठेयुः ॥ तद्दक्षिणतः कर्त्तोत्तरकलशंबिभ्रदुदङ्मुखस्तिष्ठेत् ॥ कर्तुर्दक्षिणपार्श्वेसंस्कार्यउदङ्
मुखस्तिष्ठेत् ॥ अथकर्ताआपइत्युक्त्वा ॥ शिवाआपःसंत्वितिविप्रान्वाचयित्वागंधाइत्युक्त्वासुगंधाःपांत्वितिवाचयित्वासुमनसइत्युक्त्वासौमनस्य-
मस्त्वितिवाचयित्वाअक्षतमित्युक्त्वाअक्षतंचारिष्टंचास्त्वितिवाचयित्वादक्षिणाइत्युक्त्वास्वस्तिदक्षिणाःपांतुबहुदेयंचास्त्वितिवाचयित्वातं
कलशंपूर्ववन्निधायदक्षिणंजानुभूमौनिपात्योदङ्मुखःश्रद्धयेत्यादिसूक्तंजपित्वापुनस्तंकलशमादायोत्थायोदङ्मुखोमनःसमाधीयतामित्यु-
क्त्वासमाहितमनसःस्मइतितैरुक्तेप्रसीदंतुभवंतइत्युक्त्वाप्रसन्नाःस्मइतितैरुक्तेसर्वैःसहशांतिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥ अवि
घ्नमस्तु ॥ आयुष्यमस्तु ॥ आरोग्यमस्तु ॥ स्वस्तिशिवंकर्मास्तु ॥ कर्मसमृद्धिरस्तु ॥ धर्मसमृद्धिरस्तु ॥ पुत्रसमृद्धिरस्तु ॥ वेदसमृद्धिरस्तु ॥ शास्त्रसमृद्धि
रस्तु ॥ धनधान्यसमृद्धिरस्तु ॥ इष्टसंपदस्तु ॥ इतिपंचदशवाक्यान्युक्त्वास्वयंकर्मदेवतात्मकोभगवान्प्रजापतिःप्रीयतामित्युक्त्वाप्रीयतांभगवान्क
र्मदेवतात्मकोप्रजापतिरितितैर्वाचयित्वापुण्याहंवाचयिष्येहमित्युक्त्वावाच्यतामितितैरुक्ते ॥ उद्गातेवशकुनेसामगायसीतिऋचंसर्वैःसहप-

(6)

प्र·ग·स· ठित्वाओंपुण्याहंभवंतोब्रुवंत्वितिस्वयंमंद्रस्वरेणोक्त्वाब्राह्मणैरोंपुण्याहमितितथोक्तेपुनरेवंमध्यमस्वरेणोक्त्वातथैवतैरुक्तेपुनरेवमुच्चस्वरेणो- पु·वा·
३ क्त्वातथैवतैरुक्ते॥स्वस्तिनइंद्रोवृद्धश्रवाइत्यृचंसर्वैःसहपठित्वास्वस्तिभवंतोब्रुवंत्वितिपूर्ववदुक्त्वास्वस्तीतितथैवतैःप्रत्युक्तेस्वस्त्यमुककर्मणेभ
वंतोब्रुवंत्वितिकरिष्यमाणकर्मनामपूर्ववदुक्त्वाअमुककर्मणेस्वस्तीतितैःपूर्ववदुक्ते॥ऋध्यामस्तोममित्यृचंसर्वैःसहपठित्वाऋद्धिंभवंतोब्रुवं
त्वितिपूर्ववदुक्ते ॐ ऋध्यतामितितैस्तथैवप्रत्युक्तेसामात्यःप्राङ्मुखउपविशेत्॥इदंशौनकमते॥गृह्यपरिशिष्टेतुस्वस्त्यमुककर्मणइत्युत्तरप्रत्युत्त
रेणस्तः॥ततोविप्राःप्राङ्मुखाउपविश्यतद्वृद्धिकलशोदकंविशालेताम्रादिपात्रेनिनीययजमानंसामात्यंमंत्रैरभिषिंचेयुः॥तेचमंत्राः॥तत्सवितुर्वि
श्वामित्रःसवितागायत्री॥आपोहिष्ठेतितिनवर्चस्यांबरीषःसिंधुद्वीपआपोगायत्री॥पंचमीवर्द्धमानासप्तमीप्रतिष्ठाअंत्येद्वेअनुष्टुभौ॥आनोभद्राइ
तिदशर्चस्यराहूगणोगौतमोविश्वेदेवास्त्रिष्टुप् पंचाद्याःसप्तमीचजगत्यःषष्ठीविराट्स्थानाशिष्टास्त्रिष्टुभः॥अपनःशोशुचदघमित्यष्टर्चस्य-
कुत्सोग्निर्गायत्री॥एतोन्विंद्रमितितृचस्यांगिरसस्तिरश्चिरिंद्रोनुष्टुप्॥स्वादिष्ठयेतिदशर्चस्यमधुच्छंदाःपवमानसोमोगायत्री॥तरत्समंदीत्यृ
क्चतुष्टयस्यआवत्सारःपवमानसोमोगायत्री॥शुचीवोहव्येतिमंत्रस्यवसिष्ठोमरुतस्त्रिष्टुप्॥यदंतियच्चेतिवर्गद्वयस्य॥आद्यायावसिष्ठऋषिः॥
शिष्टानामेकादशानांपवित्रवसिष्ठावृषी॥पवमानसोमोदेवता॥गायत्रीछंदः॥यत्तेपवित्रमर्चिषीतिद्वेअग्निदेवत्ते॥उभाभ्यांदेवसवितरितिस- ३
वितृदेवत्या॥त्रिभिष्ट्वमितिअग्निसवितृदेवत्या॥पुनंतुमामितिवैश्वदेवी॥आप्यायस्वेतिपुरउष्णिक्॥पुनंतुमामिति॥यःपावमानीरिति॥पाव

(6A)

मानीर्योअध्येतीतिचानुष्टुभः॥ अग्निःशुचिव्रततमइतिविरूपोग्निर्गायत्री॥ समुद्रज्येष्ठाइतिचतसृणांवसिष्ठआपस्त्रिष्टुप्॥ त्रायंतामितितृचस्य
ससऋषयोविश्वेदेवाअनुष्टुप्॥ इमाआपःशिवतमाइत्यनेनतृचेनदेवस्यत्वेतिचयजुषाभूर्भुवःस्वरित्येताभिश्चव्याहृतिभिः कुशाग्रैःसपल्ल
वैरभिषिंचेयुः॥ ततःसुवासिनीभिर्नीराजनंकार्यंयथाचारम्॥ ततोब्राह्मणानांवैदिकमंत्राशिषोग्राह्याः॥ कर्मांतेपिपुनरेवंकार्यम्॥ इतिजयंता
दिसंमतःप्रयोगपारिजातप्रोक्तःपुण्याहवाचनविधिः॥ ॥अथहेमाद्रौदानकांडेबह्वृचपरिशिष्टोक्तत्वेनोक्तःसकलसाधारणशिष्टाचारप्राप्त
श्चपुण्याहवाचनप्रयोगः॥ कृतमंगलस्नानःस्वलंकृतःकृताचमनःप्राङ्मुखोयजमानःवस्त्राच्छादितेपीठेउपविश्यपत्नींस्वदक्षिणतःप्राङ्मु
खीमुपवेश्यसंस्कार्यंचतथैवोपवेश्य ॐ सुमुखश्चैकदंतश्चेत्यादिशुक्लांबरधरंदेवं॰ अभीप्सितार्थ॰ सर्वमंगलमांगल्ये॰ सर्वदासर्व॰ सर्वेषु
कालेषु॰ तदेवलग्नं॰ यत्रयोगीश्वरःकृष्णो॰ सर्वेष्वारब्धकार्येष्वितिश्लोकान्पठित्वा॥ ॐ लक्ष्मीनारायणाभ्यांनमः॥ उमामहेश्वराभ्यांनमः॥
शचीपुरंदराभ्यांनमः॥ मातापितृभ्यांनमः॥ इष्टदेवताभ्योनमः॥ कुलदेवताभ्योनमः॥ सर्वेभ्योदेवेभ्योनमः॥ सर्वेभ्योब्राह्मणेभ्योनमः॥ आच
मनप्राणायामौदेशकालौसंकीर्त्यामुकफलसिध्यर्थंश्वोऽद्यवामुककर्मकरिष्ये॥ तदंगतयादौपुण्याहवाचनादिकरिष्येइतिसंकल्पयेत्॥ यदा
तुप्रयोगाद्बहिर्भूतंपुण्याहवाचनाद्यंगंतदामुकफलसिध्यर्थममुककर्मकर्तुमंगभूतमादौपुण्याहवाचनादिकरिष्यइतिप्रत्येकंसंकल्पः॥ प्र
धानसंकल्पस्तुसर्वंकृत्वातद्दिनएवश्वोवाकार्यः॥ ततोयजमानःषोडशोपचारैःगणपतिमभ्यर्च्यप्रार्थयेच्च॥ ततः कर्तास्वपुरतःमहीद्यौःपृ

थ्वीचनइतिमंत्रावृत्त्यादक्षिणोत्तरतोभूमिंस्पृष्ट्वाओषधयःसमितितत्थैवतंडुलपुंजौकृत्वाआकलशेष्वितिपुंजोपरिद्वौसलक्षणौधातुम-
योमृन्मयौवाकलशौनिधायइमंमेगंगेइतितीर्थजलेनप्रत्येकंपूरयित्वागंधद्वारामितिगंधंकलशयोःप्रक्षिप्यचंदनादिनातावनुलिप्यपुष्प-
मालाभूषितौकृत्वापूर्णादर्वीतिससतंडुलाभ्यांसफलाभ्यांपात्राभ्यांकलशयोराननेपिदध्यात्॥सर्वत्रप्रतिकलशंमंत्रावृत्तिरुत्तरसंस्थ
ताच॥ततस्तत्वायामिशुनःशेपोवरुणस्त्रिष्टुप्॥कलशेवरुणावाहनेविनियोगः ॐ तत्वायामिब्रह्मणेतिउत्तरकलशेवरुणमावाहयेत्
चंदनादिनापूजयेच्च॥ततउत्तरकलशेदेवताआवाहयेदेवम्॥कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः॥मूलेतत्रस्थितोब्रह्मामध्येमातृ
गणाःस्मृताः॥कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधरा॥ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः॥अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः
॥अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा॥आयांतुममशांत्यर्थंदुरितक्षयकारकाः॥सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥आयां
तुममशांत्यर्थंदुरितक्षयकारकाः॥ततस्तत्कलशेअक्षतान्क्षिपेत्॥मातृदेवोभव॥पितृदेवोभव॥आचार्यदेवोभव॥अतिथिदेवोभवइति॥
ततःअवनिकृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधायदक्षिणेनपाणिनासुवर्णपूर्णकलशंधारयित्वा॥आशिषःप्रार्थयते॥प्रा
र्थनामाह॥एताःसत्याआशिषःसंतु॥दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिचतेनायुःप्रमाणेनपुण्याहंदीर्घमायुरस्तु॥शिवाआपःसंतु
॥सौमनस्यमस्तु॥अक्षतंचारिष्टंचास्तु॥गंधाःपांतु॥सुमंगल्यंचास्तु॥अक्षताःपांतु॥आयुष्यमस्तु॥पुष्पाणिपांतु॥सौश्रियमस्तु॥तांबू

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7A)

लानिपांतु॥ऐश्वर्यमस्तु॥दक्षिणाःपांतु॥बहुदेयंचास्तु॥दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु॥श्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचायु
ष्यंचास्तु॥अत्रसर्वत्रब्राह्मणैरस्त्विति प्रत्युत्तरंदेयम्॥यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाःशुभाःशोभनाःप्रवर्तंते तमहमोंकारमादिं
कृत्वाऋग्यजुःसामाशीर्वचनंबहुऋषिमतंसंविज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्ये॥विप्राः॥वाच्यतामितिवदेयुःएवमुत्तरत्रापियथा-
योग्यंप्रत्युत्तरंदेयम्॥ततोयजमानः॥भद्रंकर्णेभिःऋक्१द्रविणोदाद्रवि०१सवितापश्चा०१नवोनवोभव०१उच्चादिवि०१आपउंदंतुजीवसेदी-
र्घायुत्वायवर्चसे॥यत्त्वाल्हृदाकीरिणामन्यमानःऋक्१यस्मैत्वंसुकृते०१संत्वासिंचामियजुषाप्रजामायुर्धनंच॥व्रतनियमतपःस्वाध्यायक्रतु
दमदानविशिष्टानांब्राह्मणानांमनःसमाधीयताम्॥विप्राः॥समाहितमनसःस्मः॥यजमानः॥प्रसीदंतुभवंतः॥विप्राः॥प्रसन्नाःस्मः॥यजमानः
॥शांतिरस्तु॥पुष्टिरस्तु॥तुष्टिरस्तु॥वृद्धिरस्तु॥अविघ्नमस्तु॥आयुष्यमस्तु॥आरोग्यमस्तु॥शिवंकर्मास्तु॥कर्मसमृद्धिरस्तु॥धर्मसमृद्धिरस्तु
॥वेदसमृद्धिरस्तु॥शास्त्रसमृद्धिरस्तु॥पुत्रसमृद्धिरस्तु॥धनधान्यसमृद्धिरस्तु॥इष्टसंपदस्तु॥अरिष्टनिरसनमस्तु॥यत्पापंतत्प्रतिहतमस्तु॥
यच्छ्रेयस्तदस्तु॥उत्तरेकर्मण्यविघ्नमस्तु॥उत्तरोत्तरमहरहरभिवृद्धिरस्तु॥उत्तरोत्तराःक्रियाःशुभाःशोभनाःसंपद्यताम्॥इष्टाःकामाःसं
पद्यंताम्॥तिथिकरणमुहूर्तनक्षत्रसंपदस्तु॥तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंताम्॥तिथिकरणेमुहूर्तनक्षत्रेसग्रहेसदैव
तेप्रीयेताम्॥अग्निपुरोगाविश्वेदेवाःप्रीयंताम्॥इंद्रपुरोगामरुद्गणाःप्रीयंताम्॥ब्रह्मपुरोगाःसर्वेवेदाःप्रीयंताम्॥विष्णुपुरोगाःसर्वेदेवाःप्री

"Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(8)



यंताम् ॥ माहेश्वरीपुरोगाउमामातरः प्रीयंताम् ॥ वसिष्ठपुरोगाऋषिगणाः प्रीयंताम् ॥ अरूंधतीपुरोगाएकपत्न्यः प्रीयंताम् ॥ ऋषयश्छंदांस्याचा-
र्यावेदादेवायज्ञाश्चप्रीयंताम् ॥ ब्रह्मचब्राह्मणाश्चप्रीयंताम् ॥ श्रीसरस्वत्यौप्रीयेताम् ॥ श्रद्धामेधेप्रीयेताम् ॥ भगवतीकात्यायनीप्रीयताम् ॥ भगव
तीमाहेश्वरीप्रीयताम् ॥ भगवतीपुष्टिकरीप्रीयताम् ॥ भगवतीतुष्टिकरीप्रीयताम् ॥ भगवतीऋद्धिकरीप्रीयताम् ॥ भगवतीवृद्धिकरीप्रीयता
म् ॥ भगवंतौविघ्नविनायकौप्रीयेताम् ॥ भगवान्स्वामीमहासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्रीयताम् ॥ हरिहरहिरण्यगर्भाः प्रीयं
ताम् ॥ सर्वाग्रामदेवताः प्रीयंताम् ॥ सर्वाः कुलदेवताः प्रीयंताम् ॥ हताब्रह्मद्विषः ॥ हताः परिपंथिनः ॥ हताअस्यकर्मणोविघ्नकर्तारः ॥ शत्रवः पराभ
वंयांतु ॥ शाम्यंतुघोराणि ॥ शाम्यंतुपापानि ॥ शाम्यंत्वीतयः ॥ शुभानिवर्द्धताम् ॥ शिवाआपःसंतु ॥ शिवाऋतवःसंतु ॥ शिवाअग्नयःसंतु ॥ शिवाआ
हुतयःसंतु ॥ शिवाओषधयःसंतु ॥ शिवावनस्पतयःसंतु ॥ शिवाअतिथयःसंतु ॥ अहोरात्रेशिवेस्याताम् ॥ निकामेनिकामेनः पर्जन्योवर्षतु ॥
फलिन्योनओषधयः पच्यंताम् ॥ योगक्षेमोनः कल्पताम् ॥ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिताआदित्यपुरोगाः सर्वेग्रहाःप्री
यंताम् ॥ भगवन्नारायणः प्रीयताम् ॥ भगवान्पर्जन्यः प्रीयताम् ॥ प्रीयतांभगवान्स्वामीमहासेनः पुण्याहकालान्वाचयिष्ये ॥ वाच्यतां ॥ ॐ उद्गा
तेवशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि ॥ वृषेववाजीशिशुमतीरपीत्यासर्वतोनः शकुनेभद्रमावद्विश्वतोनः शकुनेपुण्यमावद ॥
याज्ययायजन्तिप्रत्तिर्वैयाज्या पुण्यैवलक्ष्मीः पुण्यामेवतल्लक्ष्मींसंभावयन्तिपुण्यांलक्ष्मींसंस्कुरुते ॥ यत्पुण्यंनक्षत्रं ॥ तद्वद्कुर्वीतोपव्युषम् ॥



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8A)

यदावैसूर्यउदेति॥अथनक्षत्रंनैति॥यावतितत्रसूर्योगच्छेत्॥यत्रजघन्यंपश्येत्॥तावतिकुर्वीतयत्कारीस्यात्॥पुण्याहएवकुरुते॥तानिवा
एतानि॥यमनक्षत्राणि॥यान्येवदेवनक्षत्राणि॥तेषुकुर्वीतयत्कारीस्यात्॥पुण्याहएवकुरुते॥मत्यंसकुटुंबिनेमहाजनान्नमस्कुर्वाणायआ
शीर्वचनमपेक्षमाणायामुककर्मणःपुण्याहंभवंतोब्रुवंत्विति त्रिर्वदेत्॥ओंपुण्याहमिति त्रिर्वदेयुर्विप्राः॥ॐस्वस्तयेवायुमुपब्रवामहेसोमंस्व
स्तिभुवनस्ययस्पतिः॥बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः॥आदित्यउदयनीयःपथ्ययैवेतःस्वस्त्याप्रयंतिपथ्यांस्वस्ति
मभ्युद्यंतिस्वस्त्येवेतःप्रयंतिस्वस्त्युद्यंतिस्वस्त्युद्यंति॥स्वस्तिनइंद्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः॥स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनो
बृहस्पतिर्दधातु॥अष्टौदेवावसवःसोम्यासः॥चतस्रोदेवीरजराःश्रविष्ठाः॥तेयज्ञंपांतुरजसःपरस्तात्॥संवत्सरीणममृतंस्वस्ति॥मत्य-
मित्यादिकर्मणइत्यंतंपूर्ववत्॥स्वस्तिभवंतोब्रुवंत्विति त्रिः॥ॐआयुष्मतेस्वस्तीतिप्रतिवचनंत्रिः॥ॐऋध्यामस्तोमंसनुयामवाजमानोमंत्रं
सरथेहोपयातं॥यशोनपक्वंमधुगोष्वंतराभूतांशोअश्विनोःकाममप्राः॥सर्वामृद्धिमृध्नुयामितितंवैतेजसेवपुरस्तात्सर्यभवच्छंदोभिर्मध्यतो
क्षरैरुपरिष्टाद्गायत्र्यासर्वतोद्वादशाहंपरिभूयसर्वामृद्धिमार्ध्नोत्सर्वामृद्धिमृध्नोतियएवंवेद॥ऋध्यास्महव्यैर्नमसोपसद्य॥मित्रंदेवंमित्रधेयंनो
अस्तु॥अनूराधान्हविषावर्द्धयंतः॥शतंजीवेमशरदःसवीराः॥त्रीणित्रीणिवैदेवानामृद्धानि॥त्रीणिछंदांसित्रीणिसवनानि॥त्रयइमेलोकाः
॥ऋध्यामेवतद्वीर्यएषुलोकेषुप्रतितिष्ठति॥मत्यमित्यादिअस्यकर्मणःऋद्धिंभवंतोब्रुवंतुइतित्रिः॥ॐऋध्यतामितिप्रतिवचनंत्रिः॥ॐश्रि

येजातः श्रियआनिरियायश्रियंवयोजरितृभ्योदधाति॥श्रियंवसानाअमृतत्वमायन्भवंतिसत्यासमिथामितद्रौ॥श्रियएवैनंतच्छ्रियामादधाति 
संततमृचावषट्कृत्यंसंतत्यैसंधीयतेप्रजयापशुभिर्यएवंवेद॥यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत्॥अमुंचलोकमिदमूचसर्वम्॥तन्नोनक्षत्रमभि-
जिद्विजित्य॥श्रियंदधात्वहृणीयमानम्॥अहेर्बुध्नियमंत्रंमेगोपाय॥यमृषयस्त्रयीविदाविदुः॥ऋचःसामानियजूंषि॥साहिश्रीरमृतासतां
॥एतैर्मंत्रैर्नीराजनंकारयति॥मत्वमित्यादिपूर्ववत्॥अमुककर्मणोंतेश्रीरस्त्विति त्रिर्वदेत्॥ॐ अस्तुश्रीरितित्रिर्विप्राः॥ वर्षशतंपूर्णमस्तु॥शि
वंकर्मास्तु॥गोत्राभिवृद्धिरस्तु॥कर्मांगदेवताः प्रीयंताम्॥शुक्रेभिरंगैरजआततन्वान्क्रतुंपुनानःकविभिःपवित्रैः॥शोचिर्वसानःपर्यायुरपां
श्रियोमिमीतेबृहतीरनूनाः॥तदप्येषश्लोकोभिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे॥आविक्षितस्यकामप्रेर्विश्वेदेवाःसभासदइति॥
ततउत्तरकलशंदक्षिणहस्तेदक्षिणकलशंवामहस्तेगृहीत्वातास्यांधाराद्वयंसंततंपात्रेनिषिंचेदेभिर्मंत्रैः॥ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्स्वा
वेशोअनमीवोभवानः॥यत्वेमहेप्रतितन्नोजुषस्वशंनोभवद्विपदेशंचतुष्पदे॥वास्तोष्पतेप्रतरणोनएधिगयस्फानोगोभिरश्वेभिरिंदो॥अज
रासस्तेसख्येस्यामपितेवपुत्रान्प्रतिनोजुषस्व॥वास्तोष्पतेशग्मयासंसदातेसक्षीमहिरण्वयागातुमत्या॥पाहिक्षेमउतयोगेवरंनोयूयं॰॥अ
मीवहावास्तोष्पतेविश्वारूपाण्याविशन्॥सखासुशेवएधिनः॥शिवम् ॥ततः कर्तुर्वामतः पत्नीमुपवेश्यपात्रपातितजलेनपल्लवदूर्वाभिरुद
ङ्मुखाविप्राअभिषिंचेयुस्तिष्ठंतः॥ तत्रमंत्राः॥समुद्रज्येष्ठाइतिचतसृणांवसिष्ठआपस्त्रिष्टुप्॥अभिषेकेविनियोगः॥ॐ समुद्रज्येष्ठाःसलि 

(9A)

लस्यमध्यात्पुनानायंत्यनिविशमानाः॥ इंद्रोयावज्रीवृषभोरराद ताआपोदेवीरिहमामवंतु॥ याआपोदिव्याउतवास्रवंतिखनित्रिमाउतवायास्वयंजाः
॥समुद्रार्थायाः शुचयः पावकास्ताआपोदेवीरिहमामवंतु॥ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानाम्॥ मधुश्चुतः शुचयोयाः पावका
स्ता०॥ यासुराजावरुणोयासुसोमोविश्वेदेवायासूर्यंमदंति॥ वैश्वानरोयास्वग्निःप्रविष्टस्ता०॥ त्रायंतामिहदेवास्त्रायतांमरुतांगणः॥ त्रायंतांवि-
श्वाभूतानियथायमरपाअसत्॥ आपइद्वाउभेषजीरापोअमीवचातनीः॥ आपः सर्वस्यभेषजीस्तास्तेकृण्वंतुभेषजम्॥ हस्ताभ्यांदशशाखा
भ्यांजिह्वावाचःपुरोगवी॥ अनामयित्नुभ्यांत्वाताभ्यांत्वोपस्पृशामसि॥ इमाआपः शिवतमाइमाः सर्वस्यभेषजीः॥ इमाराष्ट्रस्यवर्धनीरिमाराष्ट्रभृतो
मृताः॥ याभिरिंद्रमभ्यषिंचत्प्रजापतिःसोमंराजानंवरुणंयमंमनुं॥ ताभिरद्भिरभिषिंचामित्वामहंराज्ञांत्वमधिराजोभवेह॥ महांतंत्वामहीनांसं
म्राजंचर्षणीनांदेवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनद्देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसासूर्यस्यवर्चसेंद्रस्येंद्रि
येणाभिषिंचामि॥ बलायश्रियैयशसेन्नाद्याय ॐ भूर्भुवःस्वः॥ इंद्रियंवा एतदस्मिंल्लोकइत्यादिब्राह्मणम्॥ सुरास्त्वामभिषिंचंत्वित्यादिपौराणि
कान्श्लोकानपिपठंति॥ अभिषेकेतच्छंयोरितिमंत्रांतेअमृताभिषेकोस्त्वितिपठेयुः॥ ततआचारप्राप्तंवस्त्रादिदानंतत्परिधानंच॥ एवंबह्वृचपरि
शिष्टोक्तंशिष्टाचारप्राप्तंचैकीकृत्यपुण्याहवाचनसूक्तम्॥ ॥इतिश्रीमद्विद्वन्मुकुटमाणिक्यश्रीरामेश्वरभट्टसुतनारायणभट्टविरचितेप्रयो
गरत्नेसर्वकर्मोपयोगीपुण्याहवाचनप्रयोगः॥ ॥अथलोकानुसारेणानुकल्पपक्षमाश्रित्यांकुरार्पणप्रयोगः॥ गर्भाधानादिनामकर्मांतकर्मा

(10)

 

णिहित्वाअन्नप्राशनादिविवाहांतापत्यसंस्कारेषुअन्येषुच्चनवागारप्रवेशादिशुभकर्मसुसद्योंकुरार्पणंकुर्यात् ॥ तच्चैवं ॥ देशकालौस्मृत्वामु
ककर्मसाफल्यनिरंतरशुभत्वसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंअंकुरार्पणंकरिष्येइतिसंकल्प्यशुद्धभूमिंगोमयेनोपलिप्यरंगवल्यादिभि
रलंकृत्यतत्रसिताक्षतान्प्रकीर्यकिंचिद्गंभीरंनववेणुपात्रंसूत्रेणावेष्ट्यतद्देवपालिकात्वेनसंस्थाप्यवल्मीकमृदंह्रदपंकंशुष्कगोमयचूर्णंचतत्र
प्रक्षिप्यपालिकामूलेश्वेततंदुलैःपूरयित्वादूर्वांकुराश्वत्थशिरीषबिल्वपत्राणामुपरिशुभेमुहूर्तेतद्वेणुपात्रंनिरीक्ष्यतत्रसितरक्तहरितवर्णानि
पुष्पाण्यवकीर्यमध्यादिपंचस्थानेषुपंचदेवताःपूजयेत् ॥ तत्रब्रह्मजज्ञानंकुत्सोब्रह्मात्रिष्टुप् ॥ अनेनपालिकामध्येब्रह्माणमावाहयेत् ॥
यत्तइंद्रेतिप्रगाथोभर्गइंद्रोबृहती ॥ अनेनपूर्वभागेइंद्रमावाहयेत् ॥ नाकेसुपर्णंभार्गवोवेनोयमस्त्रिष्टुप् ॥ अनेनदक्षिणेयममा० ॥ तत्त्वाया
मिब्रह्मणाअजीगर्तिःशुनःशेपोवरुणस्त्रिष्टुप् ॥ अनेनपश्चिमेवरुणमा० ॥ सोमोधेनुंराहूगणोगोतमःसोमस्त्रिष्टुप् ॥ अनेनोत्तरेसोममावाह
येत् ॥ ततःब्रह्मणेनमआसनमित्यादिक्रमेणषोडशोपचारैःपंचदेवताःसम्यगभ्यर्च्यपालिकापश्चिमतःप्राङ्मुखस्तिष्ठन्नुपतिष्ठेत ॥ दिशांपती
न्नमस्यामिसर्वकामफलप्रदान् ॥ कुर्वंतुसफलंकर्मकुर्वंतुसततंशुभमिति ॥ ततःसिततंडुलांस्तोयेनप्रक्षाल्यप्राच्यादिचतुर्दिक्षुबीजप्रतिनिधि-
त्वेनसमंत्रंवापयेत् ॥ तत्रयत्तइंद्रेत्यादयश्चत्वारोमंत्राःप्रागुक्ताः ॥ ॥ इतिनारायणभट्टकृतेप्रयोगरत्नेसद्योंकुरार्पणप्रयोगः ॥ ॥ अथाभ्युदयिक
श्राद्धविधिः ॥ तच्चगर्भाधानादिगर्भसंस्कारेषुजातकर्मादिष्वपत्यसंस्कारेषुअग्न्याधानादिषुश्रौतकर्मसुश्रवणाकर्मादिषुवापीकूपतडागारामा ७

(10A)

द्युद्यापनादिषुदेवप्रतिष्ठायांवानप्रस्थाश्रमसंन्यासस्वीकारेतुलापुरुषादिमहादानादौनवगृहप्रवेशेमहानाम्न्यादिवेदव्रतेषुराजाभिषेकशांतिक-
पौष्टिकेषुसर्वेषुउपाकर्मोत्सर्जनयोरप्येकेनवीनयोर्वात्तयोरन्यत्राप्येवंविधेकार्यम्॥इदमाभ्युदयिकश्राद्धंवक्ष्यमाणंचमातृपूजनमेकस्यानेकसंस्का
रेषुएककर्तृकेषुयुगपदुपस्थितेषुसर्वादौसकृदेवतंत्रेणकार्यम्॥नतुसंस्कारमावृत्त्या॥यथादैवादकृतजातकर्मादिकस्योपनयनकालेजातकर्मा
द्यनुष्ठानेदेशांतरगतस्यमृतबुध्याकृतौर्ध्वदेहिकस्यागतस्यपुनर्जातकर्मादिसंस्काराणांविहितानांयुगपदनुष्ठानेकर्मनाशाजलस्पृष्टादीनांप्रा-
यश्चित्ततयापुनःसंस्काराणांयुगपदनुष्ठानेवा॥तदुक्तंब्रह्मपुराणे॥गणशःक्रियमाणानांमातृभ्यःपूजनंसकृत्॥सकृदेवभवेच्छ्राद्धमादौनपृथ
गादिष्विति॥तत्राभ्युदयिकश्राद्धेकर्तव्येमानुष्योदैव्यश्चद्विविधामातरआदौपूज्याः॥तत्रमानुष्यामातरोष्टौमातृपितामहीप्रपितामह्यः॥माताम
हीमातुःपितामहीमातुःप्रपितामहीतिषट्पितृष्वसामातृष्वसाचेति॥ब्रह्मण्याद्यास्तथासप्तदुर्गाक्षेत्रगणाधिपान्॥ब्रह्मण्याद्याः॥ब्राह्मीमाहेश्वरी
चैवकौमारीवैष्णवीतथा॥वाराहीचतथेंद्राणीचामुंडाःसप्तमातरः॥दुर्गाक्षेत्राधिपतिंगणाधिपतिंचपूजयेत्॥तथाकात्यायनः॥कुड्यलग्नावसोर्धा
राःपंचधाराघृतेनतु॥कारयेत्सप्तवाधारानातिनीचानचोच्छ्रिताः॥गौरीपद्माशचीमेधासावित्रीविजयाजया॥देवसेनास्वधास्वाहामातरोलोकमा
तरः॥धृतिःपुष्टिस्तथातुष्टिरात्मदेवतयासहेति॥आत्मदेवतात्मकुलदेवता॥आयुष्याणिचशांत्यर्थंजपेदत्रसमाहितः॥आयुष्याणिआनोभद्रा
इत्यादीनि॥ततःवृद्धिश्राद्धंनवदैवत्यम्॥पार्वणत्रयात्मकम्॥तत्रक्रममाहाश्वलायनाचार्यः॥मातापितामहीचैवसंपूज्याप्रपितामही॥पित्राद

(1.

(11)

प्र·ग·र·
८

यस्त्रयश्चैवमातुःपित्राद्यस्त्रयः॥ एतेनवार्चनीयाःस्युःपितरोभ्युदयेद्विजैरिति॥ यत्तुवृद्धवसिष्ठः॥ नांदीमुखेविवाहेचप्रपितामहपूर्वकम्॥ नाम
संकीर्तयेद्विद्वानन्यत्रपितृपूर्वकमितिस्मृत्यर्थसारश्च॥ वृद्धमुख्यास्तुपितरोवृद्धिश्राद्धेषुभुंजतेइतितच्छाखांतरविषयकम्॥ आश्वलायनानांतु
॥आनुलोम्येनमात्रादिक्रमेणैव॥ आश्वलायनाचार्यवचनात्॥ यत्तुब्रह्मपुराणे॥ पितापितामहश्चैवतथैवप्रपितामहः॥ त्रयोह्यश्रुमुखाह्येतेपि
तरःसंप्रकीर्तिताः॥ तेभ्यःपूर्वेत्रयोयेतुतेतुनांदीमुखाःस्मृताइतितन्महालयप्रकरणपठितप्रौष्ठपदपौर्णमासीनिमित्तकश्राद्धविषयंतत्प्रकरणपा
ठादित्येवंहेमाद्र्यादयऊचिरे॥ इहचनांदीमुखसंज्ञकान्मात्रादीनुद्दिशेत्॥ विष्णुपुराणे॥ कन्याविवाहादीननुक्रम्यनांदीमुखान्पितृनादौतर्पयेत्प्र
यतोगृहीत्युक्तेः॥ ब्रह्मपुराणेच॥ जन्माद्यनुक्रम्यपितॄन्नांदीमुखान्मातृपर्यायाद्विधिपूर्वकमित्युक्तेः॥ वृद्धपराशरेणतु॥ देवानामपिनांदीमुखविशेषण
मुक्तमत्रनांदीमुखेभ्योदेवेभ्यःप्रदक्षिणंकुशासनमिति॥ वृद्धिश्राद्धेन कालः॥ कर्माहात्पूर्वेद्युर्मातृपार्वणम्॥ कर्माहेपितृपार्वणम्॥ कर्मोत्तराहेमाता
महपार्वणमिति॥ अस्यासंभवेपूर्वेद्युरेवपूर्वाह्णेमातृपार्वणंमध्याह्नेपितृकंअपराह्णेमातामहानां॥ अस्याप्यसंभवेआह वृद्धमनुः॥ अलाभेश्रा
द्धकालानांनांदीश्राद्धत्रयंबुधः॥ पूर्वेद्युरेवकुर्वीतपूर्वाह्णेमातृपूर्वकमिति॥ इदंचमहत्सुकर्मसु॥ अल्पेषुतुकर्माहएवश्राद्धम्॥ पुत्रजन्मनितुतद्दिने
वारात्रौवाभुक्तवतोपवासिनावापुत्रजन्मानंतरमेवकार्यम्॥ अत्रसंकल्पादौविशेषःसंग्रहे॥ शुभायप्रथमंतेनवृद्धौसंकल्पमाचरेत्॥ नषच्छायदि
वाकुर्यान्महादोषोभिजायते॥ अनस्मद्दृढशब्दानामरूपाणामगोत्रिणाम्॥ आनाम्नाचातिलाद्यैश्चनांदीश्राद्धंचसव्यवत्॥ कारिकाच॥ संबंधना

नां·श्रा·
८

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com